काले ऽनन्यगतिं नित्यां कुर्य्यान्नैमित्तिकीं
क्रियाम् ।”

इति मलमासतत्त्वम् ॥*॥

अपि च ।

“अग्न्याधानं प्रतिष्ठाञ्च यज्ञदानव्रतानि च ।
देवव्रतवृषोत्सर्गचूड़ाकरणमेखलाः ।
माङ्गल्यमभिषेकञ्च मलमासे विवर्ज्जयेत् ॥”

इति गारुडे १२८ अध्यायः ॥*॥

अथ मलमासकर्त्तव्यव्रतादि । “चातुर्मास्यव्रतमाषाढ़ाद्युक्तपक्षेण विहितं तदप्यारब्धं श्रावणादिमलमासेऽपि कर्त्तव्यं आषाढ़ादिप्रतिदिनकर्त्तव्यत्वेन निरवकाशत्वात् ।
‘षष्ट्या तु दिवसैर्मासः कथितो वादरायणैः ॥’
इति ज्योतिःशास्त्रे पितामहेन एकमासत्वाभिधानाच्च । यच्च ।
‘संवत्सरन्तु यः पूर्णमेकभक्तेन तिष्ठति ।’
इत्यादौ माघाद्युक्तिखितसंवत्सरव्रतमारब्धं तन्मलमासेऽपि कर्त्तव्यम् ।
‘क्वचित्त्रयोदशमासाः संवत्सर इति श्रुतेः ॥’
यच्च प्रतिमासविहितं न माघाद्युक्तपक्षेण तन्मलमासेऽपि कर्त्तव्यम् । तथा च रम्भातृतीयाव्रते शिवरहस्यम् ।
‘मासि मलिम्लुचेऽप्येवं यजेद्देवीं सशङ्कराम् ।
किन्तु नोद्यापनं कार्य्यमित्याह भगवान् शिवः ।’
उद्यापनं प्रतिष्ठा । व्रतारम्भोऽपि निषिद्धः । पूर्व्वोक्तकाम्यवचनात् । ज्यैष्ठादिमासविशेषविहितं सावित्रीव्रतादिकन्तु सावकाशत्वान्मलमासे न कार्य्यम् । किन्तु प्रकृत एव ज्यैष्ठादौ कर्त्तव्यमिति । बृहस्पतिः ।
‘नित्यनैमित्तिके कुर्य्यात् प्रयतः सन् मलिम्लुचे ।
तीर्थस्नानं गजच्छायां प्रेतश्राद्धं तथैव च ॥’
नित्यमहरहः पुरस्कारविहितं स्नानसन्ध्यापञ्चमहायज्ञादि काम्यमपि तथाविधं संकल्पितं यत्किञ्चिद्द्रव्यदानशिवपूजादि । यत्तं भविष्ये ।
‘कुर्य्यात् प्रात्यहिकं कर्म्म प्रयतः सन् मलिम्लुचे ।
नैमित्तिकञ्च कुर्व्वीत सावकाशं न यद्भवेत् ॥’
कालमाधवीये मत्स्यपुराणम् ।
‘वर्षे चाहरहः श्राद्धं दानञ्च प्रतिवासरम् ।
गोभूतिलहिरण्यानां मासेऽपि स्यान्मलिम्लुचे ॥’
काठकगृह्यपरिशिष्टम् ।
‘प्रवृत्तं मलमासात् प्राक् यत् कर्म्म न समापितम् ।
आगते मलमासेऽपि तत् समाप्यमसंशयम् ॥’
ब्रह्मसिद्धान्ते ।
‘आरब्धं कर्म्म यत्किञ्चित्तत्कार्य्यं हि मलिम्लुचे ॥’
नैमित्तिकं माससंवत्सरदिवसादिविशेषनियमशून्यावश्यकर्त्तव्यकादाचित्कनिमित्तोत्पन्नम् ॥ जातकर्म्माद्यपि मलमासे कार्य्यम् ।
‘जातकर्म्मान्त्यकर्म्माणि नवश्राद्धं तथैव च ।
मघात्रयोदशीश्राद्धं श्राद्धान्यपि च षोड़श ॥
चन्द्रसूर्य्यग्रहे स्नानं दानश्राद्धक्रियादिकम् ।
कार्य्यं तन्मलमासेऽपि नित्यं नैमित्तिकं तथा ॥’
स्मृतिः ।
‘श्राद्धजातकनामानि ये च संस्कारमाश्रिताः ।
मलिम्लुचेऽपि कर्त्तव्याः काम्या दृष्टीश्च वर्ज्जयेत् ॥’
संस्कारा अन्नप्राशननिष्क्रमणादयः । इति माधवाचार्य्यः । अन्त्यकर्म्माणि वह्निदहनोदकदानपिण्डदानास्थिसञ्चयादीनि । नवश्राद्धम् ।
‘चतुर्थे पञ्चमे चैव नवमैकादशे तथा ।
यदत्र दीयते जन्तोस्तन्नवश्राद्धमुच्यते ॥’

इति यमोक्तम् ॥

अत्र चतुर्थाहादिग्रहणं मरणदिनावधीति । बालग्रहभूतग्रहनराधिपप्रबलशत्रुदुःसहरोगाभिभवाद्भुतदुःस्वप्नग्रहदौस्थ्यादिनिमित्तं शान्तिकर्म्माणि मलमासेऽपि कर्त्तव्यम् । विष्णुना शान्तिस्वस्त्ययनैर्दैवोपघातान् शमयेत् परचक्रोपघाताच्च इत्युक्तम् ।” इति मलमासतत्त्वम् ॥

**मलयः**, पुं, ( मलते धरति चन्दनादिकमिति । मल् + “वलिमलितनिभ्यः कयन् ।” उणा० ४ । ९९ । इति कयन् । ) स्वनामख्यातपर्व्वतः । तत्पर्य्यायः । आषाढ़ः २ दक्षिणाचलः ३ । इति हेमचन्द्रः ।४ । ९५ ॥ चन्दनाद्रिः ४ मलयाचलः ५ । इति शब्दरत्नावली ॥ (स च सप्तकुलाचलान्तर्गतः । यथा, मार्कण्डेये । ५७ । १०—११ ।
“महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ।
विन्ध्यश्च पारिपात्रश्च सप्तैवात्र कुलाचलाः ॥”)
शैलाङ्गम् । देशविशेषः । ( यथा, मात्स्ये । ११३ । ४४ ।
“अङ्गा वङ्गा मद्गुरका अन्तर्गिरिवहिर्गिरी ।
ततः प्रवङ्गमातङ्गमलयामलवर्त्तिकाः ॥”)
आरामः । इति मेदिनी । ये, ९९ ॥ नन्दनवनम् । इति धरणिः ॥ अष्टादशोपद्वीपान्तर्गतद्वीपविशेषः । इति शब्दमाला ॥ ऋषभदेवस्य शतपुत्रान्तर्गतपञ्चमपुत्रः । ( यथा, श्रीभागवते । ५ । ४ । १० । “तमनु कुशावर्त्त इलावर्त्तो ब्रह्मावर्त्तो मलयः केतुर्भद्रसेन इन्द्रस्पृक् विदर्भः कीकट इति नव नवतिप्रधानाः ॥” गरुड़वंशीयानामन्यतमः । यथा, महाभारते । ५ । १०१ । १४ ।
“सुस्वरो मधुपर्कश्च हेमवर्णस्तथैव च ।
मलयो मातरिश्वा च निशाकरदिवाकरौ ॥”)

**मलयगन्धिनी**, स्त्री, ( मलयस्य गन्धः अस्त्यस्याः । मलयगन्ध + इनिः । स्त्रियां ङीप् । ) उमासखीविशेषः । इति शब्दमाला ॥

**मलयजं**, पुं, क्ली, (मलयात् जायते इति । जन् + डः । ) चन्दनम् । इत्यमरः । २ । ६ । १३१ ॥ ( यथा, गीतगोविन्दे । ३ । ११ ।
“हृदि विसलताहारो नायं भुजङ्गमनायकः
कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः ॥
मलयजरजो नेदं भस्म प्रियारहिते मयि
प्रहर न हरभ्रान्त्यानङ्ग ! क्रुधा किमु
धावसि ॥”
मलयजाते, त्रि । यथा, महाभारते । १ । २१ । ६ ।
“उत्पतद्भिरिवाकाशं वृक्षैर्मलयजैरपि ॥”)
यथा च ।
“राहुं मलयजं शूद्रं पैठीनं ह्रादशाङ्गुलम् ।
कृष्णां कृष्णाम्बरं सिंहासनं ध्यात्वा तथाऽर्च्चयेत् ॥”

इति ग्रहयज्ञतत्त्वम् ॥

**मलया**, स्त्री, ( मल + कयन् । टाप् । ) त्रिवृता । इति मेदिनी । ये, ९९ ॥

**मलयाचलः**, पुं, ( मलयश्चासावचलश्चेति । ) मलयपर्व्वतः । इति शब्दरत्नावली ॥ ( यथा, सुश्रुते उत्तरतन्त्रे । ४७ अध्याये ।
“पुन्नागनागकरवीरकृतोपकारे
तस्मिन् यदि कमलरेणुकवो शयीत ।
यत्राहतानिलविकम्पितपुष्पदाम्नि
हेमन्तविन्ध्यहिमवन्मलयाचलानाम् ॥”)

**मलयानिलः**, पुं, ( मलयस्यानिलः । ) वसन्तकालीनवायुः । तत्पर्य्यायः । वासन्तः २ । इति त्रिकाण्डशेषः ॥ (यथा, साहित्यदर्पणे ।३।१२६।
“स एव सुरभिः कालः स एव मलयानिलः ।
सैवेयमबला किन्तु मनोऽन्यदिव दृश्यते ॥”)

**मलयूः**, स्त्री, ( मलपूः । पृषोदरादित्वात् पस्य यत्वम् ।) मलपूः । इति शब्दरत्नावली ॥

**मलयोद्भवं**, क्ली, ( मलयः उद्भव उत्पत्तिकारणं यस्य । ) चन्दनम् । इति राजनिर्घण्टः ॥

**मलविनाशिनी**, स्त्री, (मलं विनाशयतीति । वि + नश् + णिच् + णिनिः । स्त्रियां ङीप् । ) शङ्खपुष्पी । इति राजनिर्घण्टः ॥

**मलहन्ता**, [ऋ] पुं, (मलं हन्तीति । हन् + तृच् ।) शाल्मलीकन्दः । इति राजनिर्घण्टः ॥

**मला**, स्त्री, (मल + अच् । टाप् ।) भूम्यामलकी । इति शब्दचन्द्रिका ॥

**मलाकर्षी**, [न्] पुं, (मलं विष्ठां आकर्षति स्थानात् स्थानान्तरं नयतीति । आ + कृष् + णिनिः । ) चाड़िकः । इति शब्दमाला । चाड़ि इति भाषा ॥

**मलाका**, स्त्री, ( मलेन मनोमालिन्येन अकति कुटिलं गच्छतीति । अक् + अच् । स्त्रियां टाप् । ) कामिनी । हस्तिनी । दूती । इति संक्षिप्तसारोणादिवृत्तिः ॥

**मलापकर्षणं**, क्ली, ( अप + कृष् + भावे ल्युट् । मलस्यापकर्षणम् । ) पापमोचनम् । मलदूरीकरणम् । इति केचित् ॥

**मलापहा**, स्त्री, (मलमपहन्तीति । अप + हन् + डः । स्त्रियां टाप् । ) नदीविशेषः । यथा,—
“मलापहा भीमरथी च वङ्गा
यथा च कृष्णा जलसाम्यगा गुणैः ।
मलापहावङ्गयोस्तथापि
पथ्यं लघु स्वादुतरं सुकान्तिदम् ॥”

इति राजनिर्घण्टः ॥

**मलावहं**, क्ली, (मलं आवहतीति । आ + वह + अच् ।) नवविधपापान्तर्गतपापविशेषः । यथा, मानवे । ११ । ७१ ।